श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

कृष्णयजुर्वेदीय तैत्तिरीयोपनिषदि

# ॥ महानारायणोपनिषत् ॥

## ॥ द्राविडपाठः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ महानारायणोपनिषत् ॥

## ॥ द्राविडपाठः ॥

॥ हरिः ओ(४)म् ॥

स॒ह ना॑ववतु।

स॒ह नौ॑ भुनक्तु।

स॒ह वी॒र्यं॑ करवावहै।

ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚।

ओं शान्ति॒श्शान्ति॒श्शान्तिः॑ ॥

अम्भ॑स्यपा॒रे भुव॑नस्य॒ मध्ये॒

नाक॑स्य पृ॒ष्ठे म॑ह॒तो मही॑यान्।

शु॒क्रेण॒ ज्योती॑ग्ंषि समनु॒प्रवि॑ष्टः

प्र॒जाप॑तिश्चरति॒ गर्भे॑ अ॒न्तः।

यस्मि॑न्नि॒दग्ं सञ्च॒ विचैति॒

सर्व॒ं यस्मि॑न्दे॒वा अधि॒ विश्वे॑ निषे॒दुः।

तदे॒व भू॒तं तदु॒ भव्य॑मा

इ॒दं तद॒क्षरे॑ पर॒मे व्यो॑मन्न्।

येना॑वृ॒तं खं च॒ दिव॑ं म॒हीं च॒

येना॑दि॒त्यस्तप॑ति॒ तेज॑सा॒ भ्राज॑सा च।
यम॒न्तस्स॑मु॒द्रे क॒वयो॒ वय॑न्ति॒
यद॒क्षरे॑ पर॒मे प्र॒जाः।
यत॑ः प्रसू॒ता ज॒गत॑ः प्रसू॒ती तोये॑न
जी॒वान्व्यस॑सर्ज॒ [व्यच॑सर्ज॒] भूम्या᳚म्।
यदोष॑धीभिः पु॒रुषा᳚न्प॒शूग्‌श्च॒
विवे॑श भू॒तानि॑ चराच॒राणि॑।
अत॑ः पर॒ं नान्य॒दणी॑यसग्ं हि॒
परा᳚त्पर॒ं यन्मह॑तो म॒हान्त᳚म्।
यदे॑कम॒व्यक्त॒मन॑न्तरूप॒ं विश्व॑ं
पु॒रा॒णं तम॑स॒ः पर॑स्तात्॥ 1 ॥

तदे॒वर्त॑ं तदु॑ स॒त्यमा॑हु॒स्तदे॒व
ब्रह्म॑ पर॒मं क॑वी॒नाम्।
इ॒ष्टा॒पू॒र्तं ब॑हु॒धा जा॒तं जाय॑मानं
वि॒श्वं बि॑भर्ति॒ भुव॑नस्य॒ नाभि॑ः।
तदे॒वाग्निस्तद्वा॒युस्तथ्सूर्य॒स्तदु॑ च॒न्द्रमा᳚ः।
तदे॒व शु॒क्रम॒मृत॒ं तद्ब्रह्म॒ तदाप॒स्स प्र॒जाप॑तिः।
सर्वे॑ निमे॒षा ज॒ज्ञिरे॑ वि॒द्युत॒ः पुरु॑षा॒दधि॑।
क॒ला मु॑हू॒र्ताः काष्ठा᳚श्चाहोरा॒त्राश्च॑ सर्व॒शः।
अ॒र्ध॒मा॒सा मासा॑ ऋ॒तव॑स्संवथ्स॒रश्च॑ कल्पन्ताम् [कल्पताम्]।

स आप॑ः प्रदु॒घे उ॒भे इ॒मे अ॒न्तरि॑क्ष॒मथो॒ सुव॑ः।
नैन॑मू॒र्ध्वं न ति॒र्यञ्चं॒ न मध्ये॒ परि॑जग्रभत्।
न तस्ये॑शे॒ कश्च॒ न तस्य॑ नाम म॒हद्यश॑ः॥ **2**॥

न स॒न्दृशे॑ तिष्ठति॒ रूप॑मस्य॒
न चक्षु॑षा पश्यति॒ कश्च॒नैन॑म्।
हृ॒दा म॑नी॒षा मन॑सा॒ऽभिक्लृ॑प्तो॒
य ए॑नं वि॒दुरमृ॑ता॒स्ते भ॑वन्ति।
अ॒द्भ्यस्सम्भू॑तो हिरण्यग॒र्भ इत्य॒ष्टौ।
ए॒ष हि दे॒वः प्र॒दिशोऽनु॒ सर्वा॒ः
पूर्वो॑ हि जा॒तस्स उ॒ गर्भे॑ अ॒न्तः।
स वि॒जाय॑मानस्स जनि॒ष्यमा॑णः
प्र॒त्यङ्मु॑खाँस्तिष्ठति वि॒श्वतो॑मुखः।
वि॒श्वत॑श्चक्षुरु॒त वि॒श्वतो॑मुखो
वि॒श्वतो॑हस्त उ॒त वि॒श्वत॑स्पात्।
सम्बा॒हुभ्यां॒ नम॑ति॒ सम्पत॑त्रै॒र्द्यावा॑पृथि॒वी
ज॒नय॑न्दे॒व एक॑ः।
वे॒नस्तत्पश्य॒न्विश्वा॒ भुव॑नानि
वि॒द्वान् यत्र॒ विश्वं॒ भव॒त्येक॑नीळम्।
यस्मि॑न्नि॒दग्ं सञ्च॒ वि चैक॒ग्ं॒ स ओत॒ः
प्रोत॑श्च वि॒भु प्र॒जासु॑।

प्र तद्वोचे अमृतं नु विद्वान्गन्धर्वो
नाम निहितं गुहासु॥ **3**॥

त्रीणि पदा निहिता गुहासु
यस्तद्वेद स वितुः पिताऽसत्।
स नो बन्धुर्जनिता स विधाता
धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये
धामान्यभ्यैरयन्त।
परि द्यावापृथिवी यन्ति सद्यः
परि लोकान्परि दिशः परि सुवः।
ऋतस्य तन्तुं विततं विचृत्य
तदपश्यत्तदभवत् प्रजासु।
परीत्य लोकान्परीत्य भूतानि
परीत्य सर्वाः प्रदिशो दिशश्च।
प्रजापतिः प्रथमजा
ऋतस्यात्मनाऽऽत्मानमभि संबभूव।
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्।
सनिं मेधामयासिषम्।
उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम॥ **4**॥

प॒शूग्श्च॒ मह्य॒माव॑ह॒ जीव॑नं च॒ दिशो॑ दश [दिश]।
मा नो॑ हिग्ंसीज्जातवेदो॒ गामश्वं॒ पुरु॑षं॒ जग॑त्।
अबि॑भ्र॒दग्न॒ आग॑हि श्रि॒या मा॒ परि॑पातय।
पुरु॑षस्य विद्म सहस्रा॒क्षस्य॑ महादे॒वस्य॑ धीमहि।
तन्नो॑ रुद्रः प्रचो॒दया᳚त्।
तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि।
तन्नो॑ रुद्रः प्रचो॒दया᳚त्।
तत्पुरु॑षाय वि॒द्महे॑ वक्रतु॒ण्डाय॑ धीमहि।
तन्नो॑ दन्तिः प्रचो॒दया᳚त्।
तत्पुरु॑षाय वि॒द्महे॑ सुवर्णप॒क्षाय॑ धीमहि॥ **5**॥

तन्नो॑ गरुडः प्रचो॒दया᳚त्।
का॒त्या॒य॒नाय॑ वि॒द्महे॑ कन्यकु॒मारि॑ धीमहि।
तन्नो॑ दुर्गिः प्रचो॒दया᳚त्।
ना॒रा॒य॒णाय॑ वि॒द्महे॑ वासुदे॒वाय॑ धीमहि।
तन्नो॑ विष्णुः प्रचो॒दया᳚त्।
स॒ह॒स्र॒पर॑मा दे॒वी॒ श॒तमू॑ला श॒ताङ्कु॑रा।
सर्वग्ं॑ हरतु॑ मे पा॒पं॒ दू॒र्वा दु॑स्स्वप्न॒नाश॑नी।
अश्व॑क्रा॒न्ते र॑थक्रा॒न्ते॒ वि॒ष्णुक्रा᳚न्ते व॒सुन्ध॑रा।
शिर॑सा धारि॑ता दे॒वी॒ र॒क्ष॒स्व मां᳚ प॒दे प॑दे।
उ॒द्धृता॑ऽसि व॑राहे॒ण॒ कृ॒ष्णे॒न श॑तबा॒हुना॥ **6**॥

भूमिर्धेनुर्धरणी लोकधारिणी।
मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम्।
त्वया हतेन पापेन जीवामि शरदश्शतम्।
मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्।
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
[गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।]
ईश्वरीग्ं सर्वभूतानां तामिहोपह्वये श्रियम्।
हिरण्यश्रृङ्गं वरुणं प्रपद्ये
तीर्थं मे देहि याचितः।
यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः।
यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्।
तन्न इन्द्रो वरुणो बृहस्पतिस्सविता च
पुनन्तु पुनः पुनः॥ 7॥

सुमित्रा न आप ओषधयस्सन्तु दुर्मित्रास्तस्मै
भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः।
नमोऽग्नयेऽप्सुमते नम इन्द्राय
नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः।
[नमोऽग्नयेऽप्सुमते नम इन्द्राय
नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः।]
यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात्।

अ॒त्या॒श॒नादं॑तीपा॒ना॒द्य॒च्च उं॒ग्रात् प्र॒तिग्रं॒हात्।
तन्मे॒ वरुं॑णो रा॒जा॒ पा॒णिनाँ ह्यव॒मर्॒शंतु।
सों॑ऽहमंपा॒पो वि॒रजो॒ निर्मु॒क्तो मुं॒क्तकि॒ल्बिषंः।
नाकंस्य पृ॒ष्ठमारुं॑ह्य॒ गच्छे॒द् ब्रह्मं॑सलो॒कताम्।
इ॒मं मे॑ गङ्गे यमुने सरस्वति॒ शुतुं॑द्रि॒ स्तोमग्ं
सचता॒ परु॒ष्णिया।
अ॒सि॒क्नि॒या मं॑रुद्वृधे वि॒तस्त॒याऽऽर्जीकीये
शृणु॒ह्या सु॒षोमं॑या।
ऋ॒तं च॑ स॒त्यं चाभीँ॑द्धा॒त्तप॒सोऽध्यं॑जायत॥ **8**॥

तत॒ो रात्रिं॑रजायत॒ ततं॑स्समु॒द्रो अ॑र्ण॒वः।
स॒मु॒द्राद॑र्ण॒वादधिं॑ संवथ्स॒रो अं॑जायत।
अ॒हो॒रा॒त्राणिं॑ वि॒दध॒द्विश्वं॑स्य मिष॒तो व॒शी।
सू॒र्या॒च॒न्द्र॒मसौ॑ धा॒ता यं॑था पू॒र्वमं॑कल्पयत्।
दिवं॑ च पृथि॒वीं चा॒न्तरिं॑क्ष॒मथो॒ सुवंः।
यत् पृं॑थि॒व्याग्ं रजं॑स्स्व॒मान्तरिं॑क्षे वि॒रोदं॑सी।
इ॒माग्स्तदा॒पो वं॑रुणः पु॒नात्वं॑घमर्॒ष॒णः।
ए॒ष भू॒तस्यं॑ भ॒व्ये भुवं॑नस्य गो॒प्ता।
ए॒ष पु॒ण्यकृं॑तां लो॒का॒न॒ेष मृ॒त्योर्हिं॑र॒ण्मयँ॑म्।
द्यावां॑पृथि॒व्योर्हिं॑र॒ण्मय॒ग्ं॒ सग्ग्ं श्रिं॑त॒ग्ं॒ सुवंः॥ **9**॥

स नः सुवः सगंशिंशाधि।
आर्द्रं ज्वलंति ज्योतिरहमंस्मि।
ज्योतिर्ज्वलंति ब्रह्माहमंस्मि।
योऽहमंस्मि ब्रह्माहमंस्मि।
अहमेवाहं मां जुंहोमि स्वाहाँ।
अकार्यकार्यवकीर्णीस्तेनो भ्रूंणहा गुंरुतल्पगंः।
वरुंणोऽपामंघमर्षणस्तस्माँत् पापात्प्रमुंच्यते।
रजोभूमिंस्त्वमाग् रोदंयस्व प्रवंदन्ति धीराँः।
पुनन्तु ऋषंयः पुनन्तु वसंवः पुनातु
वरुंणः पुनात्वंघमर्षणः।
आक्राँन्थ्समुद्रः प्रंथमे विधंर्मञ्जनयंन्प्रजा
भुवंनस्य राजाँ॥ **10**॥

वृषां पवित्रे अधि सानो अव्यें
बृहथ्सोमों वावृधे सुवान इन्दुंः।
जातवेंदसे सुनवाम सोमंमरातीयतो निदंहाति वेदंः।
स नंः पर्षदतिं दुर्गाणि विश्वां
नावेव सिन्धुं दुरिताऽत्यग्निः।
तामग्निवंर्णां तपंसा ज्वलन्तीं
वैरोचनीं कंर्मफलेषु जुष्टाँम्।
दुर्गां देवीग् शरंणमहं प्रपंद्ये

सु॒तर॑सि तर॒से॒ नम॑ः।
अग्ने॒ त्वं पा॑रया॒ नव्यो॑ अ॒स्मान्थ्स्व॒स्तिभि॒रति॑
दु॒र्गाणि॒ विश्वा᳚।
पूश्च॑ पृ॒थ्वी ब॑हु॒ला न॑ उ॒र्वी
भवा॑ तो॒काय॒ तन॑याय॒ शंयोः।
विश्वा॑नि नो दु॒र्गहा॑ जातवेद॒स्सिन्धु॒ं न
ना॒वा दु॑रि॒ताऽति॑पर्॒षि।
अग्ने॑ अत्रि॒वन्मन॑सा गृणा॒नो᳚ऽस्माकं॑
भूत्ववि॒ता त॒नूना᳚म्।
पृ॒त॒ना॒जित॒ग्ं॒ सह॑मानम॒ग्निमु॒ग्रग्ं॒
हु॑वेम पर॒माथ्स॒धस्था᳚त्।
स न॑ः पर्॒षदति॑ दु॒र्गाणि॒ विश्वा॒
क्षाम॑द्दे॒वो अति॑ दुरि॒ताऽत्य॒ग्निः।
प्र॒त्नोषि॑ क॒मीड्यो॑ अध्व॒रेषु॑ सना᳚च्च॒
होता॒ नव्य॑श्च॒ सत्सि॑।
[प्र॒त्नोषि॑ क॒मीड्यो॑ अध्व॒रेषु॑ स॒नाच्च॒
होता॒ नव्य॑श्च॒ सत्सि॑।]
स्वाञ्चा᳚ग्ने त॒नुवं॑ पि॒प्रिय॑स्वा॒स्मभ्यं॑
च॒ सौभ॑ग॒माय॑जस्व॥ **11**॥

पर॑स्ता॒द्यशो॒ गुहा॑सु॒ मम॑ सुवर्णप॒क्षाय॑ धीमहि शतबा॒हुना
पुन॑ः पुनरजायत॒ सुवो॒ राजा॑ स॒धस्था᳚त्त्रीणि॑ च॥ **1**॥

भूर॒ग्नये॑ पृथि॒व्यै स्वाहा॒
भुवो॑ वा॒यवे॒ऽन्तरि॑क्षाय॒ स्वाहा॒
सुव॑रादि॒त्याय॑ दि॒वे स्वाहा॒
भूर्भुव॒स्सुव॑श्च॒न्द्रम॑से दि॒ग्भ्यस्स्वाहा॒
नमो॑ दे॒वेभ्य॑स्स्व॒धा पि॒तृभ्यो॒ भूर्भुव॒स्सुव॒रोम्॥ **12**॥ ॥ **2**॥

भूरन्न॑म॒ग्नये॑ पृथि॒व्यै स्वाहा॒
भुवोऽन्नं᳚ वा॒यवे॒ऽन्तरि॑क्षाय॒ स्वाहा॒
सुव॒रन्न॑मादि॒त्याय॑ दि॒वे स्वाहा॒
भुर्भुव॒स्सुव॒रन्नं᳚ च॒न्द्रम॑से दि॒ग्भ्यस्स्वाहा॒
नमो॑ दे॒वेभ्य॑स्स्व॒धा पि॒तृभ्यो॒ भूर्भुव॒स्सुव॒रन्न॒मोम्॥ **13**॥ ॥ **3**॥

भूर॒ग्नये॑ च पृथि॒व्यै च॑ मह॒ते च॒ स्वाहा॒
भुवो॑ वा॒यवे॑ चा॒न्तरि॑क्षाय च मह॒ते च॒ स्वाहा॒
सुव॑रादि॒त्याय॑ च दि॒वे च॑ मह॒ते च॒ स्वाहा॒
भूर्भुव॒स्सुव॑श्च॒न्द्रम॑से च॒ नक्ष॑त्रेभ्यश्च
दि॒ग्भ्यश्च॑ मह॒ते च॒ स्वाहा॒ नमो॑ दे॒वेभ्य॑स्स्व॒धा
पि॒तृभ्यो॒ भुर्भुव॒स्सुव॒र्मह॒रोम्॥ **14**॥ ॥ **4**॥

पा॒हि नो॑ अग्न॒ एन॑से॒ स्वाहा॑
पा॒हि नो॑ विश्ववेद॑से॒ स्वाहा॑
य॒ज्ञं पा॑हि विभा॒वसो॒ स्वाहा॒
सर्वं॑ पाहि शतक्रतो॒ स्वाहा᳚॥ **15**॥ ॥ **5**॥

[पाहि नो अग्न एनसे स्वाहा।
पाहि नो विश्ववेदसे स्वाहा।
यज्ञं पाहि विभावसो स्वाहा।
सर्वं पाहि शतक्रतो स्वाहा॥ 15॥ ॥ 5॥]

यश्छन्दसामृषभो विश्वरूपश्छन्दोभ्यश्छन्दाग्ंस्या
विवेश सताग्ं शिक्यः प्रोवाचोपनिषदिन्द्रो
ज्येष्ठ इन्द्रियाय ऋषिभ्यो नमो देवेभ्यस्स्वधा
पितृभ्यो भूर्भुवस्सुवरोम्॥ 16॥ ॥ 6॥

नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं
धारयिता भूयासं कर्णयोश्श्रुतं
मा च्योढ्वं ममामुष्य ओम्॥ 17॥ ॥ 7॥

ऋतं तपस्सत्यं तपश्श्रुतं तपश्शान्तं
तपो दानं तपो यज्ञस्तपो
भूर्भुवस्सुवर्ब्रह्मैतदुपास्वैतत्तपः॥ 18॥ ॥ 8॥

यथा वृक्षस्य सम्पुष्पितस्य दूराद्गन्धो वात्येवं
पुण्यस्य कर्मणो दूराद्गन्धो वाति यथाऽसिधारां
कर्तेऽवहितामवक्रामेद्यद्युवे युवे ह वा
विह्वलिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं
जुगुप्सेत्॥ 19॥ ॥ 9॥

अ॒णोरणी॑यान्महतो मही॑यानात्मा
गुहा॑यां॒ निहि॑तोऽस्य ज॒न्तोः।
तम॑क्रतुं पश्यति वीतशो॒को धा॒तुः
प्र॒सादा॓न्महि॒मान॑मीशम्।
स॒प्त प्रा॒णाः प्र॒भव॑न्ति॒
तस्मा॓थ्स॒प्तार्चिष॑स्स॒मिध॑स्स॒प्त जि॒ह्वाः।
स॒प्त इ॒मे लो॒का येषु॒ चर॑न्ति प्रा॒णा
गु॒हाश॑यां॒ निहि॑तास्स॒प्तस॑प्त।
अत॑स्समु॒द्रा गि॒रय॑श्च॒ सर्वे॒ऽस्माथ्स्यन्द॑न्ते॒
सिन्ध॑व॒स्सर्व॑ रूपाः।
अत॑श्च॒ विश्वा॒ ओष॑धयो॒ रसा॓श्च॒
येनै॑ष भूतस्ति॑ष्ठत्यन्तरा॒त्मा।
ब्र॒ह्मा दे॒वाना॓ं पद॒वीः क॑वी॒नामृषि॒र्विप्रा॑णां
महि॒षो मृगाणा॓म्।
श्ये॒नो गृद्ध्रा॑णा॒ग्॒ स्वधि॑ति॒र्वना॑ना॒ग्॒
सोम॑ः प॒वित्र॒मत्ये॑ति॒ रेभन्न्॑।
अ॒जामेका॒ं लोहि॑तशुक्ल कृ॒ष्णां ब॒ह्वीं
प्र॒जां ज॒नय॑न्ती॒ग्॒ सरू॑पाम्।
अ॒जो ह्येको॑ जु॒षमा॑णोऽनु॒शेते॒
जहा॓त्येनां भु॒क्तभो॑गा॒मजो॓ऽन्यः॥ **20**॥

हगंसश्शुचिषद्वसुरन्तरिक्षसद्धोता
वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा
ऋतजा अद्रिजा ऋतं बृहत्।
यस्माञ्जाता न परा नैव किञ्चनास य
आविवेश भुवनानि विश्वा।
प्रजापतिः प्रजया संविदानस्त्रीणि
ज्योतीगंषि सचते स षोडशी।
विधर्तारगं हवामहे वसोः कुविद्वनाति नः।
सवितारं नृचक्षसम्।
अद्या नो देवसवितः प्रजावथ्सावीस्सौभगम्।
परा दुष्वप्नियगं सुव।
विश्वानि देव सवितर्दुरितानि परासुव।
यद्भद्रं तन्म आसुव॥ **21**॥

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः।
माध्वीर्नस्सन्त्वोषधीः।
मधु नक्तमुतोषसि मधुमत्पार्थिवगं रजः।
मधु द्यौरस्तु नः पिता।
मधुमान्नो वनस्पतिर्मधुमागं अस्तु सूर्यः।
माध्वीर्गावो भवन्तु नः।

घृतं मिमिक्षे घृतमस्य योनिर्घृते
  श्रितो घृतमुवस्य धाम।
अनुष्वधमावह मादयस्व स्वाहाकृतं
  वृषभ वक्षि हव्यम्।
समुद्रादूर्मिर्मधुमाꣳ उदारदुपाꣳशुना
  सममृतत्वमानट्।
घृतस्य नाम गुह्यं यदस्ति जिह्वा
  देवानाममृतस्य नाभिः॥ **22**॥

वयं नाम प्रब्रवामा घृतेनास्मिन्
  यज्ञे धारयामा नमोभिः।
उप ब्रह्मा शृणवच्छस्यमानं
  चतुश्शृङ्गोऽवमीद्गौर एतत्।
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे
  शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
  महो देवो मर्त्याꣳ आविवेश।
त्रिधा हितं पणिभिर्गुह्यमानं
  गवि देवासो घृतमन्वविन्दन्।
[त्रिधा हितं पणिभिर्गुह्यमानं
  गवि देवासो घृतमन्वविन्दन्।]

इन्द्र एकगं सूर्य एकं जजान
  वेनादेकग्ग्ं स्वधया निष्टंतक्षुः।
यो देवानां प्रथमं पुरस्ताद्विश्वाधिकों
  रुद्रो महर्षिः।
हिरण्यगर्भं पंश्यत जायंमानगं स नों
  देवश्शुभया स्मृत्या संयुंनक्तु।
यस्मात्परं नापंरमस्ति किञ्चिद्यस्मान्नाणींयो
  न ज्यायोंऽस्ति कश्चिंत्।
वृक्ष इंव स्तब्धो दिवि तिंष्ठत्येकस्तेनेदं
  पूर्णं पुरुंषेण सर्वम्॥ **23**॥

न कर्मणा न प्रजया धनेंन त्यागेंनैके अमृतत्वमांनशुः।
परेंण नाकं निहिंतं गुहांयां
  विभ्राजंते यद्यतंयो विशन्तिं।
वेदान्त विज्ञान सुनिंश्चितार्थास्सन्न्यांस
  योगाद्यतंयश्शुद्ध सत्त्वाः।
ते ब्रंह्मलोके तु परान्तकाले
  परांमृतात्परिंमुच्यन्ति सर्वे।
दहरं विपाप्मं परवेंऽश्म भूतं
  यत्पुंण्डरीकं पुरमंध्यसग्ग्स्थम्।
तत्रापि दहरं गगनं विशोकस्तस्मिंन्

यदन्तस्तदुपासितव्यम्।
यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः॥ 24॥

अजोऽन्यस्सुव नाभिस्सर्वमष्टौ च॥ 10॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम्।
विश्वं नारायणं देवमक्षरं परमं प्रभुम्।
विश्वतः परमं नित्यं विश्वं नारायणगं हरिम्।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति।
पतिं विश्वस्यात्मेश्वरगं शाश्वतगं शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्।
[नारायणं महाज्ञेयं विश्वात्मानं परायणम्।]
नारायणपरं ब्रह्म तत्वं नारायणः परः।
[नारायणपरं ब्रह्म तत्त्वं नारायणः परः।]
नारायणपरो ज्योतिरात्मा नारायणः परः।
[नारायणपरो ज्योतिरात्मा नारायणः परः।]
यच्च किञ्चिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥ 25॥

अनन्तमव्ययं कविगं समुद्रेऽन्तं विश्वशंभुवम्।
पद्मकोशप्रतीकाशगं हृदयं चाप्यधोमुखम्।
अधो निष्ट्या वितस्त्यां तु नाभ्यामुपरि तिष्ठति।

हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्।
सन्ततग्ं सिराभिस्तु लम्बत्या कोशसन्निभम्।
तस्यान्ते सुषिरग्ं सूक्ष्मं तस्मिन्थ्सर्वं प्रतिष्ठितम्।
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः।
सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः।
सन्तापयति स्वं देहमापादतलमस्तकम्।
[सन्तापयति स्वं देहमापादतलमस्तकम्।]
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः।
नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा।
नीवारशूकवत्तन्वी पीता भास्यात्तनूपमा।
[नीवारशूकवत्तन्वी पीताभा स्यात्तनूपमा।]
तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः।
स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमस्स्वराट्॥ **26**॥

नारायणस्स्थितो व्यवस्थितश्चत्वारि च॥ **11**॥

ऋतग्ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गळम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः॥ **27**॥ ॥ **12**॥

आदित्यो वा एष एतन्मण्डलं तपति तत्र ता
ऋचस्तदृचां मण्डलग्ं स ऋचां लोकोऽथ
य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि
स साम्नां मण्डलग्ं स साम्नां लोकोऽथ

य एष एतस्मिंन्मण्डलेऽर्चिषि पुरुंषस्तानि
यजूगंषि स यजुंषा मण्डलगं स यजुंषां
लोकस्सैषा त्र्य्येवं विद्या तंपति
य एषोँऽन्तरांदित्ये हिंरण्मयः पुरुंषः॥ **28** ॥ ॥ **13** ॥

आदित्यो वै तेज ओजो बलं यशश्चक्षुश्श्रोत्रंमात्मा
मनों मन्युर्मनुंर्मृत्युस्सत्यो मित्रो
वायुरांकाशः प्राणो लोंकपालः कः किं कं
तथ्सत्यमन्नमायुंरमृतों जीवो विश्वंः
कतमस्स्वंयम्भुः प्रजापंतिस्संवथ्सर इतिं
संवथ्सरोंऽसावांदित्यो य एष पुरुंष एष
भूतानामधिंपतिर्ब्रह्मंणस्सायुंज्यगं
सलोकतांमाप्नोत्येतासांमेव देवतांनागं
सायुंज्यगं सार्ष्टितागं समानलोकतांमाप्नोति
य एवं वेदेँत्युपनिषंत्॥ **29** ॥ ॥ **14** ॥

घृणिस्सूर्यं आदित्योमंर्चयन्ति तपंस्सत्यं
मधुं क्षरन्ति तद्ब्रह्म तदाप आपो
ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्॥ **30** ॥ ॥ **15** ॥

सर्वो वै रुद्रस्तस्मैं रुद्राय नमों अस्तु।
पुरुंषो वै रुद्रस्सन्महो नमोनमंः।

विश्वं भूतं भुवनं चित्रं बहुधा
जातं जायमानं च यत्।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥ **31** ॥ ॥ **16** ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे।
वोचेम शन्तमगं हृदे।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥ **32** ॥ ॥ **17** ॥

नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय
उमापतये नमो नमः॥ **33** ॥ ॥ **18** ॥

यस्य वैकङ्कत्यग्निहोत्रहवणी भवति प्रतिष्ठिताः
प्रत्येवास्याहुतयस्तिष्ठन्त्यथो प्रतिष्ठित्यै॥ **34** ॥ ॥ **19** ॥

कृणुष्व पाज इति पञ्च॥ **35** ॥ ॥ **20** ॥

अदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुरास्तेषाग्ं
सर्वभूतानां माता मेदिनी महती
मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला
विश्वा भूता कतमा का या सा
सत्येत्यमृतेति वसिष्ठः॥ **36** ॥ ॥ **21** ॥

आपो वा इदग्ं सर्वं विश्वा भूतान्यापः प्राणा वा
आपः पशव आपोऽमृतमापोऽन्नमापस्सम्राडापो

[आपः॑ प्र॒शव॒ आपो॒ऽमृत॒मापो॒ऽन्न॒मापः॑स्स॒म्राडापो॑]
वि॒राडापः॑स्स्व॒राडाप॒श्छन्दा॒ग्॒स्यापो॒
ज्योती॒ग्॒ष्यापः॑स्स॒त्यमाप॒स्सर्वा॑ दे॒वता॒
आपो॒ भूर्भुव॒स्सुव॒राप॒ ओम्॥ **37**॥ ॥ **22**॥

आपः॑ पुनन्तु पृथि॒वीं पृ॑थि॒वी पू॒ता पु॑नातु॒ माम्।
पु॒नन्तु॒ ब्रह्म॑ण॒स्पति॒र्ब्रह्म॑पू॒ता पु॑नातु॒ माम्।
यदु॒च्छि॑ष्ट॒मभो॓ज्यं॒ यद्वा॑ दु॒श्चरि॑तं॒ मम॑।
सर्वं॑ पुनन्तु॒ मामापो॑ऽस॒तां च॑ प्रति॒ग्रह॒ग्ग्॒ स्वाहा॓॥ **38**॥ ॥ **23**॥

अग्निश्च मा मन्युश्च मन्युपतयश्च मन्यु॑कृते॒भ्यः।
पापेभ्यो॑ रक्ष॒न्ताम्।
यदह्ना पाप॑मका॒र्षम्।
मनसा वाचा॑ हस्ता॒भ्याम्।
पद्भ्यामुदरे॑ण शि॒श्ञा।
अह॒स्तद॑वलु॒म्पतु।
यत्किञ्च॑ दु॒रि॒तं मयि॑।
इदमहं माममृ॑तयो॒नौ।
सत्ये ज्योतिषि जुहो॑मि स्वा॒हा॥ **39**॥ ॥ **24**॥

सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्यु॑कृते॒भ्यः।
पापेभ्यो॑ रक्ष॒न्ताम्।

यद्रात्रिया पापंमकार्षम्।
मनसा वाचां हस्ताभ्याम्।
पद्भ्यामुदरेंण शिश्ना।
रात्रिस्तदंवलुम्पतु।
यत्किञ्चं दुरितं मयिं।
इदमहं माममृंतयोनौ।
सूर्ये ज्योतिषि जुहोंमि स्वाहा॥ **40** ॥ ॥ **25** ॥

आयांतु वरंदा देव्यक्षरं ब्रह्म सम्मिंतम्।
गायत्रीं छन्दंसां मातेदं ब्रंह्म जुषस्वं नः।
ओजोंऽसि सहोंऽसि बलंमसि भ्राजोंऽसि देवानां
धाम नामांसि विश्वंमसि विश्वायुस्सर्वंमसि
सर्वायुरभिभूरों गायत्रीमावांहयामि॥ **41** ॥ ॥ **26** ॥

ओं भूः।
ओं भुवः [ओं भुवंः]।
ओगं सुवः [ओगं सुवंः]।
ओं महः [ओं महंः]।
ओं जनः [ओं जनंः]।
ओं तपः [ओं तपंः]।
ओगं सत्यम्।
ओं तथ्संवितुर्वरेंण्यं भर्गो देवस्यं धीमहि।

धियो यो नः प्रचोदयात्।
ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्॥ **42**॥ ॥ **27**॥

ओं भूर्भुवस्सुवर्महर्जनस्तपस्सत्यं तद्ब्रह्म
तदाप आपो ज्यातीरसोऽमृतं ब्रह्म
भूर्भुवस्सुवरोम्॥ **43**॥ ॥ **28**॥

ओं तद्ब्रह्म [ओं तद्ब्रह्म]।
ओं तद्वायुः [ओं तद्वायुः]।
ओं तदात्मा [ओं तदात्मा]।
ओं तथ्सर्वम् [ओं तथ्सर्वम्]।
ओं तत्पुरोर्नमः [ओं तत्पुरोर्नमः]॥ **44**॥ ॥ **29**॥

उत्तमे शिखरे देवी भूम्यां पर्वतमूर्धनि।
ब्राह्मणेभ्यो ह्यनुज्ञानं गच्छ देवि यथासुखम्॥ **45**॥ ॥ **30**॥

ओं अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु।
त्वं यज्ञस्त्वं विष्णुस्त्वं वषट्कारस्त्वग्ं
रुद्रस्त्वं ब्रह्मा त्वं प्रजापतिः॥ **46**॥ ॥ **31**॥

अमृतोपस्तरणमसि॥ **47**॥ ॥ **32**॥

प्राणे निविंष्टोऽमृतं जुहोमि।
प्राणाय स्वाहा।

अपाने निविंष्टोऽमृतं जुहोमि।
अपानाय स्वाहाँ।
व्याने निविंष्टोऽमृतं जुहोमि।
व्यानाय स्वाहाँ।
उदाने निविंष्टोऽमृतं जुहोमि।
उदानाय स्वाहाँ।
समाने निविंष्टोऽमृतं जुहोमि।
समानाय स्वाहाँ।
ब्रह्मंणि म आत्माऽमृंतत्वायं॥ **48**॥ ॥ **33**॥

प्राणे निविंष्टोऽमृतं जुहोमि।
शिवो मांऽऽविशाप्रंदाहाय।
प्राणाय स्वाहाँ।
अपाने निविंष्टोऽमृतं जुहोमि।
शिवो मांऽऽविशाप्रंदाहाय।
अपानाय स्वाहाँ।
व्याने निविंष्टोऽमृतं जुहोमि।
शिवो मांऽऽविशाप्रंदाहाय।
व्यानाय स्वाहाँ।
उदाने निविंष्टोऽमृतं जुहोमि।
शिवो मांऽऽविशाप्रंदाहाय।

उ॒दा॒ना॒य॒ स्वाहा᳚।
स॒मा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि।
शि॒वो मा॑ऽऽवि॒शाप्र॑दाहाय।
स॒मा॒ना॒य॒ स्वाहा᳚।
ब्रह्म॑णि म आ॒त्माऽमृ॑त॒त्वाय॑॥ **49** ॥ ॥ **34** ॥

अ॒मृ॒ता॒पि॒धा॒नम॑सि॥ **50** ॥ ॥ **35** ॥

श्र॒द्धायां᳚ प्रा॒णे निवि॑श्या॒मृतग्ं॑ हु॒तं
प्रा॒णमन्ने॑नाप्यायस्व।
अ॒पा॒ने निवि॑श्या॒मृतग्ं॑
हु॒तम॑पा॒नमन्ने॑नाप्यायस्व।
व्या॒ने निवि॑श्या॒मृतग्ं॑ हु॒तं
व्या॒नमन्ने॑नाप्यायस्व।
उ॒दा॒ने निवि॑श्या॒मृतग्ं॑
हु॒तमु॑दा॒नमन्ने॑नाप्यायस्व।
स॒मा॒ने निवि॑श्या॒मृतग्ं॑ हु॒तग्ं
सं॑मा॒नमन्ने॑नाप्यायस्व।
ब्रह्म॑णि म आ॒त्माऽमृ॑त॒त्वाय॑॥ **51** ॥ ॥ **36** ॥

प्राणानां ग्रन्थिरसि रुद्रो
मा॑ऽऽविशा॒न्तक॒स्तेनान्नेना᳚प्याय॒स्व॥ **52** ॥ ॥ **37** ॥

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः।
ईशस्सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्॥ **53**॥ ॥ **38**॥

मेधा देवी जुषमाणा न आगाद्विश्वाची
भद्रा सुमनस्यमाना।
त्वया जुष्टा जुषमाणा दुरुक्तान्बृहद्वदेम
विदथे सुवीराः।
त्वया जुष्ट ऋषिर्भवति देवि त्वया
ब्रह्मा गतश्रीरुत त्वया।
त्वया जुष्टश्चित्रं विन्दते वसु सा नो
जुषस्व द्रविणे न मेधे॥ **54**॥ ॥ **39**॥

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती।
मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा॥ **55**॥ ॥ **40**॥

अप्सरासु या मेधा गन्धर्वेषु च यन्मनः।
दैवी मेधा मनुष्यजा सा मां मेधा सुरभिर्जुषताम्॥ **56**॥ ॥ **41**॥

आ मां मेधा सुरभिर्विश्वरूपा
हिरण्यवर्णा जगती जगम्या।
ऊर्जस्वती पयसा पिन्वमाना सा मां
मेधा सुप्रतीका जुषताम्॥ **57**॥ ॥ **42**॥

स॒द्योजा॒तं प्र॑पद्या॒मि॒ स॒द्योजा॒ताय॒ वै नमः॑।
भ॒वेभ॑वे॒ नाति॑भवे भजस्व॒ मां भ॒वोद्भ॑वाय॒ नमः॑॥ **58**॥ ॥ **43**॥

वा॒म॒दे॒वाय॒ नमो᳚ ज्ये॒ष्ठाय॒ नमो॑ रु॒द्राय॒
नम॒ः काला॑य॒ नम॒ः कल॑विकरणाय॒
नमो॒ बल॑विकरणाय॒ नमो॒ बल॑प्रमथनाय॒
नम॒स्सर्व॑भूतदमनाय॒ नमो॑ म॒नोन्म॑नाय॒ नमः॑॥ **59**॥ ॥ **44**॥

अ॒घोरे᳚भ्योऽथ॒ घोरे᳚भ्यो॒ घोर॒घोर॑तरेभ्यः
स॒र्वत॑श्शर्व॒ सर्वे᳚भ्यो॒ नम॑स्ते अस्तु रु॒द्ररू॑पेभ्यः॥ **60**॥ ॥ **45**॥

तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि।
तन्नो॑ रुद्रः प्रचो॒दया᳚त्॥ **61**॥ ॥ **46**॥

ईशानस्सर्व॑विद्या॒ना॒मीश्वरस्सर्व॑भूता॒नां॒
ब्रह्माऽधि॑पति॒र्ब्रह्म॒णोऽधि॑पति॒र्ब्रह्मा॑
शि॒वो मे॑ अस्तु सदाशि॒वोम्॥ **62**॥ ॥ **47**॥

ब्रह्म॑ मेतु॒ माम्।
मधु॑ मेतु॒ माम्।
ब्रह्म॑मे॒व मधु॑ मेतु॒ माम्।
यास्ते॑ सोम प्र॒जा व॒थ्सोऽभि॒ सो अ॒हम्।
दुस्स्व॑प्न॒हन्दु॑रुष्व॒हा।
यास्ते॑ सोम प्रा॒णाग्स्ताञ्जु॑होमि।

त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्।
ब्रह्महत्यां वा एते घ्नन्ति।
ये ब्राह्मणास्त्रिसुपर्णं पठन्ति।
ते सोमं प्राप्नुवन्ति।
आसहस्रात् पङ्क्तिं पुनन्ति।
ओम्॥ **63** ॥ ॥ **48** ॥

ब्रह्म मेधया।
मधु मेधया।
ब्रह्ममेव मधु मेधया।
अद्या नो देव सवितः प्रजावथ्सावीस्सौभगम्।
परा दुष्वप्नियग्ं सुव।
विश्वानि देव सवितर्दुरितानि परासुव।
यद्भद्रं तन्म आसुव।
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः।
माध्वीर्नस्सन्त्वोषधीः।
मधु नक्त मुतोषसि मधुमत्पार्थिवग्ं रजः॥ **64** ॥

मधु द्यौरस्तु नः पिता।
मधुमान्नो वनस्पतिर्मधुमाग्ं अस्तु सूर्यः।
माध्वीर्गावो भवन्तु नः।
य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्।

भ्रूणहत्यां वा एते घ्नन्ति।
ये ब्राह्मणास्त्रिसुपर्णं पठन्ति।
ते सोमं प्राप्नुवन्ति।
आसहस्रात् पङ्क्तिं पुनन्ति।
ओम्॥ **65**॥

रजो नव च॥ **49**॥

ब्रह्म मेधवा।
मधु मेधवा।
ब्रह्ममेव मधु मेधवा।
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां
महिषो मृगाणाम्।
श्येनो गृध्राणाग्ंस्वधितिर्वनानाग्ं सोमः
पवित्रमत्येति रेभन्न्।
हग्ंसश्शुचिषद् वसुरन्तरिक्षसद्धोता
वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा
अद्रिजा ऋतं बृहत्।
य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्।
वीरहत्यां वा एते घ्नन्ति।
ये ब्राह्मणास्त्रिसुपर्णं पठन्ति।

ते सोमं प्राप्नुवन्ति।
आसहस्रात् पङ्क्तिं पुनन्ति।
ओम्॥ **66**॥ ॥ **50**॥

प्राणापानव्यानोदानसमाना मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा॥ **67**॥ ॥ **51**॥

वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्राणरेतो
बुद्ध्याकूतिसंकल्पा मे शुध्यन्तां ज्योतिरहं
विरजा विपाप्मा भूयासग्ग् स्वाहा॥ **68**॥ ॥ **52**॥

शिरःपाणिपादपार्श्व पृष्ठोदरजङ्घशिश्नोपस्थपायवो
मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा
भूयासग्ग् स्वाहा॥ **69**॥ ॥ **53**॥

त्वक्चर्ममाग्ंसरुधिरमेदोऽस्थिमज्जा मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा॥ **70**॥ ॥ **54**॥

शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा॥ **71**॥ ॥ **55**॥

पृथिव्यप्तेजो वाय्वाकाशा मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा॥ **72**॥ ॥ **56**॥

अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया
मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा
भूयासग्ग् स्वाहा॥ 73॥ ॥ 57॥

विविट्टि स्वाहा॥ 74॥ ॥ 58॥

घषोत्काय स्वाहा॥ 75॥ ॥ 59॥

उत्तिष्ठ पुरुष हरे लोहितपिङ्गलाक्षि देहिदेहि
ददापयिता मे शुध्यन्तां ज्योतिरहं विरजा
विपाप्मा भूयासग्ग् स्वाहा॥ 76॥ ॥ 60॥

ओग् स्वाहा॥ 77॥ ॥ 61॥

सत्यं परं परग्ं सत्यग् सत्येन न
सुवर्गाल्लोकाच्च्यवन्ते कदाचन सताग् हि
सत्यं तस्मात्सत्ये रमन्ते तप इति तपो
नानशनात्परं यद्धि परं तपस्तद्दुर्धर्षं
तद्दुराधर्षं तस्मात्तपसि रमन्ते दम
इति नियतं ब्रह्मचारिणस्तस्माद्दमे
रमन्ते शम इत्यरण्ये मुनयस्तस्माच्छमे रमन्ते
दानमिति सर्वाणि भूतानि प्रशग्ंसन्ति दानान्नाति
दुष्करं तस्माद्दाने रमन्ते धर्म इति धर्मेण
सर्वमिदं परिगृहीतं धर्मान्नातिदुश्चरं

तस्मा᳚द्ध॒र्मे र॑मन्ते प्र॒जन॒ इति॒
भूया॑ग्ं॒स॒स्तस्मा॒द्भूयि॑ष्ठा॒ः प्रजा॑यन्ते॒
तस्मा॒द्भूयि॑ष्ठाः प्र॒जन॑ने रमन्ते॒ऽग्नय॒ इत्या॑ह॒
तस्मा॑द॒ग्नय॒ आधा॑तव्या अग्निहो॒त्रमित्या॑ह॒
तस्मा॑दग्निहो॒त्रे र॑मन्ते य॒ज्ञ इति॑ य॒ज्ञो हि
दे॒वाना᳚म् य॒ज्ञेन॒ हि दे॒वा दिव॑ङ्ग॒तास्तस्मा᳚द्य॒ज्ञे
र॑मन्ते मान॒समिति॑ वि॒द्वाग्ं॒स॒स्तस्मा᳚द्वि॒द्वाग्ं॒स॑
ए॒व मा॑न॒से र॑मन्ते न्या॒स इति॑ ब्र॒ह्मा ब्र॒ह्मा हि
पर॒ः परो॑ हि ब्र॒ह्मा तानि॒ वा ए॒तान्यव॑राणि॒
तपा॒ग्ंसि न्या॒स ए॒वात्य॑रेचय॒द्य ए॒वं वेदे᳚त्युप॒निष॑त्॥ **78** ॥ ॥ **62** ॥

प्रा॒जा॒प॒त्यो हारु॑णिस्सुप॒र्णेय॑ः प्र॒जाप॑तिं
पि॒तर॒मुप॑ससार॒ किं भ॑गव॒न्तः प॑र॒मं व॑द॒न्तीति॒
तस्मै॒ प्रो॑वाच स॒त्येन॑ वा॒युरावा॑ति स॒त्येना॑दि॒त्यो रो॑चते
दि॒वि स॒त्यं वा॒चः प्र॑ति॒ष्ठा स॒त्ये स॒र्वं प्रति॑ष्ठितं॒
तस्मा᳚थ्स॒त्यं प॑र॒मं वद॑न्ति॒ तप॑सा दे॒वा
दे॒वता॒मग्र॑ आय॒न्तप॒सर्ष॑य॒स्सुव॒रन्व॑विन्द॒न्तप॑सा
स॒पत्ना॒न्प्रणु॑दा॒मारा॑ती॒ग्॒स्तप॑सि स॒र्वं प्रति॑ष्ठितं॒
तस्मा॒त्तप॑ः पर॒मं वद॑न्ति॒ दमे॑न दा॒न्ताः
कि॒ल्बिष॑मवधू॒न्वन्ति॒ दमे॑न
ब्रह्मचा॒रिण॒स्सुव॑रगच्छ॒न्दमो॑ भू॒ताना᳚ं

दु॒रा॒धर्॒षं द॒मे॑ स॒र्वं॑ प्रति॑ष्ठितं॒ तस्मा॒द्दमः॑
पर॒मं वद॑न्ति॒ शमे॑न शा॒न्ताश्शि॒वमा॒चर॑न्ति॒
शमे॑न ना॒कं मु॒नयो॒ऽन्ववि॑न्द॒ञ्छमो॑ भू॒ताना᳚स्
दु॒रा॒धर्॒ष॒ग्ं॒ शमे॑ [दु॒रा॒धर्॒ष॒ञ्छमे॑] स॒र्वं॑
प्रति॑ष्ठितं॒ तस्मा॒च्छमः॑ पर॒मं वद॑न्ति दा॒नं
य॒ज्ञानां॒ वरू॑थं॒ दक्षि॑णा लो॒के दा॒तार॑ग्ं
सर्वभू॒तान्यु॑पजी॒वन्ति॑ दा॒नेनारा॑ती॒रपा॑नुदन्त दा॒नेन॑
द्वि॒षन्तो॑ मि॒त्रा भ॑वन्ति दा॒ने स॒र्वं॑ प्रति॑ष्ठितं॒
तस्मा᳚द्दा॒नं प॑र॒मं वद॑न्ति ध॒र्मो वि॑श्वस्य॒ जग॑तः
प्रति॒ष्ठा लो॒के ध॒र्मिष्ठं॑ प्र॒जा उ॑पस॒र्पन्ति॑ ध॒र्मेण॑
पा॒पम॑प॒नुद॑ति ध॒र्मे स॒र्वं॑ प्रति॑ष्ठितं॒
तस्मा᳚द्ध॒र्मं प॑र॒मं वद॑न्ति प्र॒जन॑नं॒ वै
प्र॑ति॒ष्ठा सा॒धु प्र॒जाया᳚स्त॒न्तुं त॑न्वा॒नः पि॑तॄ॒णाम॑नृ॒णो
भव॑ति॒ तदे॑व त॒स्यानृ॑णं॒ तस्मा᳚त् प्र॒जन॑नं पर॒मं
वद॑न्त्य॒ग्नयो॒ वै त्रयी॑ वि॒द्या दे॑व॒यानः॒ पन्था॑
गार्॒हप॒त्य ऋक्पृ॑थि॒वी र॑थन्त॒रम॑न्वाहार्य॒पच॑नो॒
यजु॑र॒न्तरि॑क्षं वामदे॒व्यमा॑हव॒नीय॒स्साम॑ सुव॒र्गो
लो॒को बृ॒हत्तस्मा॑द॒ग्नीन्प॑र॒मं वद॑न्त्यग्निहो॒त्रग्ं
सा॑यं प्रा॒तर्गृ॒हाणां॒ निष्कृ॑ति॒स्स्वि॑ष्टग्ं
सुहु॒तं य॑ज्ञक्रतू॒नां प्राय॑णग्ं सुव॒र्गस्य॑ लो॒कस्य॒
ज्योति॒स्तस्मा॑दग्निहो॒त्रं प॑र॒मं वद॑न्ति य॒ज्ञ इति॑

य॒ज्ञो हि दे॒वाना॓ँ य॒ज्ञेन॒ हि दे॒वा दिवं॑ ग॒ता
य॒ज्ञेनासु॑रा॒नपा॑नुदन्त य॒ज्ञेन॑ द्वि॒षन्तो मि॒त्रा
भ॑वन्ति य॒ज्ञे स॒र्वं प्रति॑ष्ठित॒ं तस्मा॓ँद्य॒ज्ञं
प॑र॒मं वद॑न्ति मान॒सं वै प्रा॑जापत्यं
प॒वित्रं॑ मान॒सेन॒ मन॑सा सा॒धु प॑श्यति मान॒सा
ऋष॑यः प्र॒जा अ॑सृजन्त मान॒से स॒र्वं प्रति॑ष्ठित॒ं
तस्मा॓ँन्मान॒सं प॑र॒मं वद॑न्ति न्या॒स
इ॒त्याहु॑र्मनी॒षिणो॓ ब्र॒ह्माणं॑ ब्र॒ह्मा विश्वः॑
कत॒मस्स्वं॑य॒म्भुः प्र॒जाप॑तिस्संवथ्स॒र इति॑
संवथ्स॒रो॑ऽसावा॑दि॒त्यो य ए॒ष आ॑दि॒त्ये पुरु॑ष॒स्स
प॑रमे॒ष्ठी ब्रह्मा॒त्मा याभि॑रादि॒त्यस्तप॑ति
र॒श्मिभि॒स्ताभिः॑ प॒र्जन्यो॑ वर्॒षति
प॒र्जन्ये॑नौषधिवनस्प॒तय॒ः प्रजा॑यन्त
ओषधिवनस्प॒तिभि॒रन्नं॑ भव॒त्यन्ने॑न प्रा॒णाः
प्रा॒णैर्बल॒ं बले॑न॒ तप॒स्तप॑सा श्र॒द्धा श्र॒द्धया॑
मे॒धा मे॒धया॑ मनी॒षा म॑नी॒षया॒ मनो॒ मन॑सा॒
शान्ति॒श्शान्त्या॑ चि॒त्तं चि॒त्तेन॒ स्मृति॒ग्ग्॒ स्मृत्या॒
स्मार॒ग्ग्॒ स्मारे॑ण वि॒ज्ञानं॑ वि॒ज्ञाने॑ना॒त्मानं॑
वेदयति॒ तस्मा॑द॒न्नं दद॒न्थ्सर्वा॓ण्ये॒तानि॑
ददा॒त्यन्ना॓ँत्प्रा॒णा भ॑वन्ति भू॒ताना॓ँ प्रा॒णैर्मनो॒

मन॑सश्च वि॒ज्ञानं॑ वि॒ज्ञाना॑दान॒न्दो
ब्र॑ह्मयो॒निस्स वा ए॒ष पु॑रुषः पञ्च॒धा प॑ञ्चा॒त्मा
येन॒ सर्व॑मि॒दं प्रोतं॑ पृथि॒वी चा॒न्तरि॑क्षं च॒ द्यौश्च॒
दिश॑श्चावान्तरदि॒शाश्च॒ स वै सर्व॑मि॒दं जग॒थ्स च॒
भूतग्ं॑ स भ॒व्यं जि॑ज्ञासक्लृ॒प्त ऋ॒त॒जा रयि॑ष्ठाः
श्र॒द्धा स॒त्यो मह॑स्वान्त॒मसो॒परि॑ष्टा॒द्ज्ञात्वा॑
तमे॒वं मन॑सा हृ॒दा च॒ भूयो॑ न
मृत्युमुप॑याहि वि॒द्वान् -तस्मा᳚न्न्या॒सम॒षां
तप॑सामतिरिक्त॒माहुः॑।
व॒सु॒र॒ण्यो॑ [व॒सु॒र॒ण्वो॑] वि॒भूर॑सि प्रा॒णे
त्वम॑सि सन्धा॒ता ब्रह्म॒न्त्वम॑सि
विश्व॒सृक्ते॑जो॒दास्त्वम॑स्य॒ग्नेर्व॑र्चो॒दास्त्वम॑सि॒
सूर्य॑स्य द्युम्नो॒दास्त्वम॑सि च॒न्द्रम॑स
उपया॒मगृ॑हीतोऽसि ब्र॒ह्मणे᳚ त्वा॒ मह॒स॒
ओमित्या॒त्मानं॑ युञ्जीत॒तद्वै म॑होप॒निष॑दं
दे॒वाना॒ं गुह्य॒ं य ए॒वं वेद॑ ब्र॒ह्मणो॑
महि॒मान॑माप्नोति॒ तस्मा᳚द्ब्र॒ह्मणो॑
महि॒मान॑मित्यु॒पनिष॑त्॥ **79**॥ ॥ **63**॥

तस्यै॒वं वि॒दुषो॑ य॒ज्ञस्या॒त्मा यज॑मानश्श्र॒द्धा पत्नी॒
शरी॑रमि॒ध्ममुरो॒ वेदि॒र्लोमा॑नि ब॒र्हि॒र्वे॒दश्शिखा॒

हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निश्शमयिता
दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो
ब्रह्मा श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति
यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो
यथ्सञ्चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो
यन्मुखं तदाहवनीयो यदस्य विज्ञानं तज्जुहोति
यथ्सायं प्रातरत्ति तथ्समिधो यथ्सायं
प्रातर्मध्यन्दिनं च तानि सवनानि ये अहोरात्रे ते
दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते
चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये
संवथ्सराश्च परिवथ्सराश्च तेऽहर्गणास्सर्ववेदसं
वा एतथ्सत्रं यन्मरणं तदवभृथ एतद्वै
जरामर्यमग्निहोत्रग्ं सत्रं य एवं विद्वानुदगयने
प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य
सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव
महिमानं गत्वा चन्द्रमसस्सायुज्यं गच्छत्येतौ
वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो
विद्वानभिजयति तस्माद् ब्रह्मणो महिमानमाप्नोति
तस्माद् ब्रह्मणो महिमानमित्युपनिषत्॥ **80**॥ ॥ **64**॥

अम्भांसि भूरग्नये भूरन्नं भूरग्नये च पाहि नो
यश्छन्दसां नमो ब्रह्मण ऋतं तपो यथा

वृ॒क्षस्या॒णोरणी॑यान्थ्सहस्र॒शीर्॑षममृ॒तं॑मादि॒त्यो वा ए॒ष
आ॑दि॒त्यो वै तेज॒ ओजो॒ घृणि॒स्स्सर्वो॒ वै क॒द्रु॒द्राय॒
नमो हिरण्यबाहवे यस्य॒ वैक॑ङ्कती कृ॒णु॒ष्व
पाजोऽदि॑ति॒रापो॒ वा इ॒दमाप॑ः पु॒न॒न्त्वग्निश्च
सूर्य॑श्चाया॒त्वों भूरों भूर्भु॒व॒स्सु॒व॒रों तदु॒त्तम्
ओमन्तश्चरत्य॑मृतोप॒स्तर॑णं प्रा॒णे निवि॑ष्टः प्रा॒णे
निवि॑ष्टश्शि॒वोऽमृतापिधा॒नग्ग्॒ श्र॒द्धायां॑ प्रा॒णे निवि॑श्य॒
प्राणानामङ्गुष्ठमात्रो मे॒धा दे॒वी मे॒धां म॒ इन्द्रो॑
ददात्वफ्स॒रास्वा मां॑ मे॒धा स॒द्यो
वा॑मदे॒वाया॒घोरे॑भ्य॒स्तत्पुरु॑षा॒येशानो ब्रह्म॑मेतु॒ ब्रह्म॑
मे॒धया॒ ब्रह्म॑ मे॒धवा॒ प्राणापान वाङ्मनश्शिरः
पाणि त्वक्चर्म शब्दस्पर्श पृथिव्यन्नमय विविंट्टि
घ॒षो॑त्का॒योत्तिष्ठोग्॒ स॒त्यं प्रां॑जाप॒त्यस्तस्यै॒वं चतु॑ष्षष्टिः ॥ **64** ॥

अम्भ॑सि॒ वृषा॑ ह॒गं॒सस्सर्वो॒ वा आया॑तु श्र॒द्धायां॒
तत्पुरु॑षाय॒ पृथिव्येका॒न्नाशी॒तिः ॥ **80** ॥

**॥ इति महानारायणोपनिषत् समाप्ता ॥**